# shrIkAshIvishveshvarAdistotram

# શ્રીકાશીવિશ્વેશ્વરાદિસ્તોત્રમ્

## Document Information

Text title : shrIkAshIvishveshvarAdistotram

File name : kAshIvishveshvarAdistotram.itx

Category : shiva

Location : doc_shiva

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Latest update : March 25, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીકાશીવિશ્વેશ્વરાદિસ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

નમઃ શ્રીવિશ્વનાથાય દેવવન્દ્યપદાય તે ।
કાશીશેશાવતારે મે દેવદેવ હ્યુપાદિશ ॥ ૧॥

માયાધીશં મહાત્માનં સર્વકારણકારણમ્ ।
વન્દે તં માધવં દેવં યઃ કાશીં ચાધિતિષ્ઠતિ ॥ ૨॥

વન્દે તં ધર્મગોપ્તારં સર્વગુહ્યાર્થવેદિનમ્ ।
ગણદેવં ઢુણ્ઢિરાજં તં મહાન્તં સ્વવિઘ્નહમ્ ॥ ૩॥

ભારં વોઢું સ્વભક્તાનાં યો યોગં પ્રાપ્ત ઉત્તમમ્ ।
તં સઢુણ્ઢિં દણ્ડપાણિં વન્દે ગઙ્ગાતટસ્થિતમ્ ॥ ૪॥

ભૈરવં દંષ્ટ્રાકરાલં ભક્તાભયકરં ભજે ।
દુષ્ટદણ્ડશૂલશીર્ષધરં વામાધ્વચારિણમ્ ॥ ૫॥

શ્રીકાશીં પાપશમનીં દમનીં દુષ્ટચેતસઃ ।
સ્વનિઃશ્રેણિં ચાવિમુક્તપુરીં મર્ત્યહિતાં ભજે ॥ ૬॥

નમામિ ચતુરારાધ્યાં સદાઽણિમ્નિ સ્થિતિં ગુહામ્ ।
શ્રીગઙ્ગે ભૈરવીં દૂરીકુરુ કલ્યાણિ યાતનામ્ ॥ ૭॥

ભવાનિ રક્ષાન્નપૂર્ણે સદ્વર્ણિતગુણેઽમ્બિકે ।
દેવર્ષિવન્દ્યામ્બુમણિકર્ણિકાં મોક્ષદાં ભજે ॥ ૮॥

ઇતિ કાશીવિશ્વેશ્વરાદિસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*shrIkAshIvishveshvarAdistotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*